



# परिशिष्टम्


## (अ) तरतमवाचका: ।



**उन्नत:** बालक:


**उन्नततर:** बालक:



**उन्नततम:** बालक:



**दीर्घा** मापिका


**दीर्घतरा** मापिका


**दीर्घतमा** मापिका


**बृहत्** पुस्तकम्


**बृहत्तरं** पुस्तकम्


**बृहत्तमं** पुस्तकम्

| क्रमाङ्क: | विशेषणम् | तरवाचकम् | तमवाचकम् |
|---|---|---|---|
| १ | बलवत् | बलवत्तर (बलीयस्) | बलवत्तम(बलिष्ठ) |
| २ | साधु | साधुतर | साधुतम |
| ३ | स्वादु | स्वादुतर (स्वादीयस्) | स्वादुतम (स्वादिष्ठ) |
| ४ | स्थूल | स्थूलतर | स्थूलतम |
| ५ | दीर्घ | दीर्घतर | दीर्घतम |
| ६ | वृद्ध | वृद्धतर (ज्यायस्) | वृद्धतम (ज्येष्ठ) |
| ७ | अल्प | अल्पतर (कनीयस्) | अल्पतम (कनिष्ठ) |
| ८ | प्रशस्य | प्रशस्यतर (श्रेयस्) | प्रशस्यतम (श्रेष्ठ) |
| ९ | सूक्ष्म | सूक्ष्मतर | सूक्ष्मतम |

१) मध्यमा अनामिकाया: **दीर्घतरा** । २) मध्यमा पञ्च-अङ्गुलिषु **दीर्घतमा** ।

३) पाण्डवेषु भीम: **बलिष्ठ:** । ४) पाण्डवेषु युधिष्ठिर: **ज्येष्ठ:** ।

तर-तम-इष्ठ-प्रत्ययान्त-विशेषणानां रूपाणि अकारान्तानि ।

अत: देव-वन-मालानां रूपसदृशानि भवन्ति।

ईयस्-प्रत्ययान्त-विशेषणानां रूपाणि स-कारान्तानि ।

## (आ) च्वि–रूपाणि ।


कृष्णीकरोति, धवलीकरोति, स्पष्टीकरोति, मलिनीभवति, लघूकरोति इत्यादीनि च्वि–रूपाणि ।



फेनकः वस्त्रं **स्वच्छीकरोति** ।
फेनकः अस्वच्छं वस्त्रं
स्वच्छं करोति, इति अर्थः ।



धूलिकणैः युतकं **मलिनीभवति** । धूलिकणैः अमलिनं युतकं
मलिनं भवति, इति अर्थः ।




शिक्षकः शब्दं **स्पष्टीकरोति** ।
शिक्षकः अस्पष्टं शब्दं
स्पष्टं करोति, इति अर्थः ।

विशेषणम् + च्वि–प्रत्ययः + कृ/भू धातुरूपाणि = 'च्वि'–रूपम् ।

✻ कृष्णीकरोति – अकृष्णं कृष्णं करोति ।
पूर्वं कृष्णं न आसीत् । अधुना कृष्णं करोति/ कृष्णत्वं प्राप्नोति ।
एवं, या स्थितिः पूर्वं नासीत् तथा नूतनां स्थितिं करोति/प्राप्नोति तत्र 'च्वि'रूपं प्रयुज्यते ।

## (इ) नामधातुः ।




मधुना सिञ्चयेत् निम्बम् ।
किन्तु निम्बः **मधुरः** न **भवति** ।
मधुना सिञ्चयेत् निम्बम् ।
किन्तु निम्बः न **मधुरायते** ।

चन्द्रमाः विश्वं **धवलं करोति** ।
चन्द्रमाः विश्वं **धवलयति** ।



प्रासादशिखरस्थोऽपि
काकः **गरुडः** न **भवति** ।
प्रासादशिखरस्थोऽपि
काकः न **गरुडायते** ।





यत्र वृक्षाः न सन्ति ।
तत्र एरण्डः अपि **द्रुमः भवति** ।
यत्र वृक्षाः न सन्ति ।
तत्र एरण्डः अपि **द्रुमायते** ।

**एतानि नामतः/विशेषणातः निर्मितानि क्रियापदानि ।**